International Journal of Engineering, Management and Humanities (IJEMH)
Volume 4, Issue 1, pp: 85-88 www.ijemh.com

# ''गौतमधर्मसूत्रस्य वैशिष्ट्यम्''

लेखकः-ड .स्वदेशरञ्जनघोषालस्मृतितीर्थः,

एसोसियेट् प्रफेसर,धर्मशास्त्रविभागीयाध्यापकः,
श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालयः,

७/२ए, पि. डब्लिउ. डि .रोड .,कोलकाता-७०००३५,पश्चिमवङ्गः,

Date of Submission: 01-01-2023 Date of Acceptance: 10-01-2023

निखिले भूमण्डलेऽस्मिन् ये तावद्धर्मसूत्रकारा विद्यन्ते, येषां विरचिता ग्रन्था अद्यापि भारतवर्षस्य चतुर्दिक्षु अतीव समादृता भवन्ति, यान् ग्रन्थानाधारीकृत्य भारतीयधर्मप्राणमानवानां नित्यनैमित्तिककाम्यकर्माणि अनुष्ठितानि,तेषु भगवत्पादेन गौतमेन कृतं धर्मसूत्रं श्रेष्ठमिति विद्वद्भिरभिमतम् । अधुना तद्‌गन्थस्य वैशिष्ट्यं किममितिविषयमधारीकृत्य प्रबन्धोऽयं विरच्यते ।

संस्कृतसाहित्ये विशेषतो दर्शने धर्मशास्त्रे च गौतम इत्यभिधेयस्य ऋषिकल्पस्य बहुधा उल्लिखः समालोक्यते । न्यायसूत्रं तद् विरचितमिति सुविदितलोके । परन्तु धर्मशास्त्रविषये यदयं धर्मशास्त्रकृद् मन्वापेक्षया अधिकतरमौज्ज्वलं भेजे । अनेकेषु धर्मशास्त्रेषु परमप्रामाणिकत्वेन यथा मनोर्वचनादिकं श्रुतिकल्पत्वेन परिकीर्त्तते तदेवोत्तरकालीनेषु धर्मशास्त्रेषु विशेषतः प्रथमतो बौधायनधर्मशास्त्रे गौतमस्य मतं सश्रद्धमुल्लिखितमस्ति । तस्य वैशिष्ट्यनिर्णयात् प्रागेव समासतः समालोचनीयम् । धर्मशास्त्रस्य लक्षणविषये स्वर्गीयपण्डितकुलनणिमिश्रमहाभागेन श्रीदेवयानपत्रिकायामिदमेव प्रतिपादितम्[१]-'धर्मशास्त्रं नाम सकलशास्त्रपुरस्कृतं निखिललोकसुरक्षकं कृत्याकृत्यविवेकप्रतिपादकत्वेन नित्यनियतोपादेयं साक्षाद् वेदार्थानुमापकत्वेन वेदवत्प्रमाणीभूतं तपःस्वाध्यायपूतचरित्राणां मनुगौतमवसिष्ठादीनामनवरतस्वाध्यायाध्ययनपूतकण्ठोद्गीर्णत्वेन परमपवित्रं गुणिगणसमादसणीयं शास्त्र'मिति'।

अस्य धर्मशास्त्रकृतः किमाकारकं वैशिष्ट्यं यद् वशात् सश्रद्धमुल्लिख्यते,तस्य नाम इति सामान्यतो विशेषणं वर्जयित्वा आधिक्यं वा न समाश्रित्य कथयितुं शक्यते यद्-वैदिकोत्तरकाले (वैदिकसंहितोत्तरकाले)वेदमन्त्राणां विश्लेषणार्थमागतानि शास्त्राणि ब्राह्मणानि तस्य वैशद्यर्थ्यं जातानि । उपनिषदो ब्राह्मणांशभूतास्तदनन्तरं वेदार्थावबोधे पाठवार्जनार्थं विरचिता वेदाङ्गा विधेया ग्रन्थाः । येषां सहायकत्वेन वेदानामत्त्यायासलभ्यानां तात्त्विकोऽर्थोऽवगन्तुं शक्यते । वेदाङ्गं वर्जयित्वा कथमपि वेदार्थावबोधे कस्यापि पारदर्शित्वं नोपजायते-इत्यवधेयमेव ।वेदाङ्गेतरशास्त्रेषु अन्यग्रन्थानामपि विरचनं परिपोषकतया नैवोपलभ्यते ।वैदिकोत्तरकाले ऋषीणामिदं परिकल्पनमासीद्यत्स्मृत्यारूढं शास्त्रं तद्विनाशमुखं भवेत्, क्रमेण जनानां स्मृतिदौर्वल्यशङ्कया । अतएव कापि विशिष्टव्यवस्थया अवलम्बनीया परिकल्पनीया वा ।यद्वशात् संक्षिप्तरुचीनां लोकानां बहुज्ञानावगतिरनायासेन वक्तुमर्हति ।एवम्बिधायां परिकल्पनायां सूत्रकारेण रचिता बहुश्रेणीका ग्रन्थाः ।येषां विचारविषयमवलम्ब्य विभिन्नया संज्ञया परिचितिर्विद्यते । तथा हि धर्मस्य परिपूर्णरूपत्वं विषयत्वेनादाय ये ये सूत्रग्रन्था विरचितास्ते ग्रन्था धर्मसूत्रपदाभिधेयाः ।एवं धर्मसूत्रान्तर्गतानामाचारादीनां गार्हस्थ्याश्रमाश्रितानां जनानामुपकारकत्वं भवेदिति परिकल्पितानि शांस्त्राणि गृह्यसूत्ररूपेण परिगणितानि ।श्रुतीनां वैशिष्ट्यं यद्-विनाविनियोगम् 'अनेनेदं तु कर्त्तव्यं विनियोगः प्रकीर्त्तितः' । विनविनियोगमन्त्राणां केवलोच्चारणफललाभो न सम्भवत्येव । विपरीतक्रमेण दुष्टशब्दादिप्रयोगात् । अनिष्ठापातत्वं तु शास्त्रनिर्देशात्मकं तदेवोल्लिखितं भाष्यकृता पातञ्जलिमहाभाष्येण । महाभाष्यसाङ्के ग्रन्थे पस्प्शाहिके आद्ये

व्याकरणाध्ययनस्य प्रयोजनमुल्लिखितमस्ति । यथा[2]-'दुष्टः शब्दः स्वरतो वर्णतो वा. मिथ्याप्रयुक्तो न तमर्थमाह ।

स वाग्वज्रो यजमानं हिनस्ति,यथेन्द्रशत्रुः स्वरतोऽपराधात्' ॥

अतएव विनियोगदर्शनार्थं तेषां तेषां संहितान्तर्गतानां मन्त्राणां सूत्राणां वा विनियोगित्वमुल्लिखितं श्रौतसूत्रे विद्यते । तेषु श्रौतसूत्रेषु विशिष्टतया गौरवं लभते आश्वलायनप्रणीतं श्रौतसूत्रम् । सर्वेषां तेषां तेषां गृह्य-धर्म-श्रौत-सूत्राणामेकीकृत्य नवीना संज्ञा विहिता कल्पसूत्रमिति । अस्मिन्नेव कल्पसूत्रे अन्यसूत्रग्रन्थापेक्षया धर्मसूत्रस्य वैशिष्ट्यं वरीवर्त्तते । अनेनैव कारणेन यद् अत्र यद्यत् सूत्रकारेण प्रतिपादितमखिलं तद्वर्णाश्रमधर्मस्य कर्त्तव्याकर्त्तव्यविधायकं शास्त्रमिति । अतएव शास्त्रमिदमुत्तरकाले विरचितानां वर्णादिभिः कृतानां स्मृतिग्रन्थानां धर्मशास्त्रापरनामकानामुत्सरूपेण परिकल्प्यते अधिकञ्च वैशिष्ट्यं वर्त्तते । अत्र यद्विद्वद्भिरिदमेवानुमीयते इदमेवानुभूयते वा तत्कल्पसुत्रस्य शाखाभूता आसन् । यथा गृह्यसूत्रं धर्मसूत्रं श्रौतसूत्रञ्चेति । इदमपि आधिक्येनोद्गीयते यदेक एव ऋषिः,यथा गृह्यसूत्रस्य रचयिता तथा धर्मसूत्रस्य, श्रौत-सूत्रस्य चापि । अतएवोदाहरणरूपेण दर्शयितुं शक्यते यत्-आपस्तम्बो यथा गृह्यसूत्रस्य प्रणेता तथैव धर्मसूत्रस्य श्रौत-सूत्रस्य चापि । प्राकरणिकमिदं पूर्वभाषणं समासत उल्लिख्य प्रस्तूयते यत्र,यद् गौतमप्रणीतं धर्मसूत्रमुत्तरकालीनानां संहि-तापरनामधेयानां परमप्रमाणीभूतमतिप्राचीनतया परिकल्प्यते । मानवीयं यद्धर्मशास्त्रं तद्धर्मशास्त्राग्रगण्यतया सर्वैः परि-गृह्यते-अस्यापि मूलं गौतमप्रणीतं धर्मसूत्रमेवेति विद्वद्वर्जानां सिद्धान्तभूतः । उदाहरणरूपेणोच्यते-गौतमीयाद्यसूत्रं[3] 'वेदो धर्ममूलम्'इति । अस्य सूत्रस्य व्याख्या टीकाकारेण हरदुत्तेन एवं कृता-यथा-कर्मजन्योऽभ्युदयनिःश्रेयसहेतुरपूर्वाख्या-त्मगुणो धर्म इति । तस्य मूलं प्रमाणं वेद इति । य एव धर्ममूलीभूतो वेदस्तस्य स्वरूपं किमिति प्रश्नावकाशो भवति-उत्तररूपेण आपस्तम्बीयवचनमनुसृत्य कथयितुं शक्यते सामान्यतो यत[4]-'मन्त्रब्राह्मणयोर्वेदनामधेयम्' । अत्र मिताक्षरा-टीकायां चत्वारो वेदा ऋग्यजुःसामाथर्वात्मकास्ते एव सर्वे धर्मे प्रमाणमिति ।न योगिप्रत्यक्षं नानुमानं नार्थापत्तिर्न शाक्या-द्यागमः । अधर्मस्यामि प्रतिषेधात्मको वेद एव मूलम् । पुनर्निषेधविधयो हि ब्रह्म इत्यादिविषये प्रवृत्तं निवर्त्तयन्ति । अतः श्रुतिरेव सर्वत्र परमप्रमाणत्वेनाकलनीयम् । मतमिदं बौधायनेनापि समर्थितम् । उक्तं च[5]-'उपदिष्टो धर्मः प्रतिवेद'मिति। अखिलमिदमेकीकृत्य मानवीये धर्मशास्त्रे द्वितीयेऽध्याये सुदढोद् घोषितम[6]-'धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुति'रिति । तदनन्तरं धर्मे गौतमपादेन द्वितीयसूत्रम्[7]"तद्विधानं च स्मृतिशीले"। वेदस्य सर्वाः शाखा अधुना नोपलभ्यन्ते इति तत्र का व्यवस्था अवलम्बनीया इत्याकांक्षायां श्रुत्यभावे श्रुतिपरिशीलितचित्तानां वेदविदां मनुयाज्ञल्क्यादीनां यानि वचनमूल-

कानि शास्त्राणि उपलभ्यन्ते यस्यापरा संज्ञा धर्मशास्त्रमिति तदेव मनुयाज्ञवल्क्यादानवलम्ब्याततत्त्वाथा वादतव्यः ।तत्रापि अवधेयञ्च यन्मन्वादयः पुरुषा योगबलात् तपोबलाच्च ज्ञानात्मकान् वेदान् अवाप्तवन्तः । अन्यतश्च तेषां विशदीकरणेन सरलीकरणेन च नवीनानि शास्त्राणि स्मृत्याख्यानि विरचयामासुरिति । प्रामाणिकत्वं मतमिदं समर्थितं भगवता जैमिनिना सूत्रद्वारेण[8]- 'अपि च कर्तृसामान्यात्प्रमाणमनुमानं स्या'दिति ।अर्थात् वेदोक्तकर्मणोऽनुष्ठानकर्त्ता स्मृतिकर्त्ता चेतिद्वयोर्मध्ये समानता अभिन्नता च विद्यते इत्यस्मात् कारणात् शिष्टपरिगृहीतमन्वादिस्मृतिः धर्मे प्रमाणं भवति । अतःपरं तृतीयप्रमाणं शीलमिति । शीलं स्वभावः सदाचार इत्यर्थः। इदमेव एकीकृत्य भगवता मनुना तद्ग्रन्थस्य द्वितीयेऽध्याये ब्रह्मचारिप्रक-रणे धर्मे कानि प्रमाणानि सन्ति किम्बा धर्मस्य स्वरूपमित्यालोचनावसरे प्रपञ्चितम्[9]-

'वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च'॥

उत्तोरोत्तरश्लोके इदमेव दृढीकृत्य पुनर्भाषितम्[10]-

'वेदः स्मृति सदाचारः स्वस्य च प्रियमात्मनः ।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम्' ।

अतएव सुप्रणीतमिदं यत्–मानवीयोऽयं निर्देशो गौतमशास्त्रविधानुग इति । सदाचारस्य प्रामाण्यमधिकृत्य आधिक्येणा-विचारितं गौतमेन उत्तरसूत्रेण[11]-'दृष्टो धर्मव्यतिक्रमः साहसं च महताम्'।

प्रतिपाद्यमिदं सदाचारस्य प्रामाण्यमङ्गीकृतं शीलधर्माचरणादिवशात्-यो नाम पुरुष ऋषिकल्प: शिष्यरूपेणाद्रियते, सामाजिकैर्विद्वद्भि:,तेषामपि साहसात्मकमाचारादिकं क्वचित्परिलोक्यते श्रुयते च शास्त्रेषु । यत: परशुरामस्य सर्वगुणोपेतस्य पितुराज्ञया मातृहननमिति।सदाचारस्य प्रामाण्येऽङ्गीकृते मातृहरणात्मकमाचरणमपि समर्थितं भवेदिति धर्महानिशङ्का जायते। तत्परिहाराय यद्यपि गौतमेन किमपि नोक्तं न वा विचारितं तथापि टीकाकृता हरदत्तेन मिताक्षराभिधानव्याख्याने ग्रन्थे समर्थात्मकवचनमुल्लिखितम्[१२]- 'तेषां तेजो विशेषेण प्रत्यवायो न विद्यते ।
तदन्वीक्ष्य प्रयुञ्जानो सीदत्यवरो जन:'॥

अतएव प्रतिपाद्यमिदं यत्-अस्याविशिष्टपरमशास्त्राविभागस्य वेदबोधितविग्रहस्य क्वचिद्भ्रमप्रमाणादिवशादाचरणे अन्यथात्वं परिदृश्यते चेत्-तेनाकर्मकरणत्वेन तस्य विशिष्टत्वं कथमपि नापगतं भवेत्?यद्यपि गौतमोपपादेये त्वदीये धर्मसूत्रे पुन: शिष्टाचारलक्षणं न प्रदत्तं किन्तु तदनुगामिना तत्समपर्यायकत्वेन बौधायनपादेन त्वदीये धर्मसूत्रे शिष्टलक्षणं प्रदर्शितम्[२३]-'शिष्टा: खलु विगतमत्सरा: कुम्भीधान्वा अलोलुपा दम्भदर्पलोभमोहक्रोधविवर्जिता:'इति ।
अत्रावधेयं यत्-अनेन सूत्रेण शिष्टलक्षणं यत्प्रदर्शितं तत्तु न सार्वत्रिकम् ,लक्षणाश्रयेण अन्येषामभिप्रेतानां ग्रहणादिति । सदाचारस्य प्रामाण्ये अङ्गीकृते अन्यकिञ्चिदपि प्रश्नावकाशत्वं वर्त्तते एव या खलु विप्रतिपत्तिपदेन उपपरिहन्यते । तत्र वक्तव्यमिदं यत्-अतिप्राचीने सुविस्तृते भारतवर्षेऽस्मिन्यद्यपि सामान्यतो वेदस्याविसंवादित्वमुद्घोष्यते तदभावे च वेदानुगानां स्मृतीनां परम्परापि अन्यरूपप्रमाणत्वं भजते । तथापि श्रुतिस्मृत्यभावे सदाचारस्य प्रामाण्यमङ्गीकृतम् । अपरा या विप्रतिपत्ति: तत्तु भवितुमर्हति भगवता गौतमेन न प्रदर्शितम् । परन्तु बौधायनेन[१४] 'पञ्चधा विप्रतिपत्ति'रित्यभिधाय उदाहरणरूपेण तत्तद्देशीयानामाचाराणामपि नाम्ना उल्लेखो विहित:, तत्तु न प्रासङ्गिकत्वमत्र इति कृत्वा यद्यपि न नाम्ना उल्लिख्यते तथापि विरुद्धसमवेशात् सदाचारस्याप्रामाण्या शङ्का जायते ।
अस्य समाधानार्थं बौधायनेन सूत्रितं[२५] 'तत्र तत्र देशप्रामाण्यमेव स्या'दिति सूत्रे वक्तव्यमिदं यद्यपि उत्तरदेशीयै: शिष्टाचारै: सह दाक्षिणात्यशिष्टाचाराणां विरोध: क्वचित्समापतति, यथा-मातुलकन्यापरिणयविषये ,तथापि स्मर्त्तव्यमिदं यत्-तत्तद्देशीयशिष्टाचारस्तत्राङ्गीकरणीय:।

बौधायनेनात्र गौतमस्य नाम्ना उल्लेखो विहित:।'मिथ्येतदिति गौतम:'[१६]। गौतमीयसमाधान मत्र'देशजातिकुलधर्माम्नायैरविरुद्धप्रमाणमिति । वक्तव्यमिदं कुलधर्मा देशधर्मा जामिधर्माश्च प्रतिदेशभिन्नास्तावदेव प्रमाणत्वे नाकलनीया यावत्ते श्रुत्यनुमोदित: । अस्मिन्नेव प्रसङ्गे गौतमीयवचनमादरणीयम्,यद्धर्मव्यापारे शिष्टाचारस्तृतीयपदवीं भजते ।अतएव इदमेव सिद्धान्तितं यत्-श्रुति: परमप्रमाणम्, द्वितीयं नाम स्मृति:,तृतीयं शिष्टचारेणानुमेया श्रुति: ।अत:परमपि धर्मविषये कानि प्रमाणानि इति संशये चतुर्थप्रमाणं नाम 'दशवरा परिषद्' इति गौतमपादेनोक्तम् । तथाच गौतमीयसूत्रम्[२७] –
'अनाज्ञाते दशावरै: शिष्टैरूहविद्भिरलुब्धै: प्रशस्तं कार्यमिति ।
तत्र विश्लेषणार्थं सूत्रान्तरेण गौतमेन[२८]–
'चत्वारश्चतुर्णां पारगा वेदानां प्रागुत्तमास्त्रय आश्रमिण: पृथग्धर्मविदस्त्रय एतान् दशावरान् परिषदित्याचक्षते '।
अस्य विश्लेषणार्थं बौधायनेन कृतं श्लोकान्तरेण[२९]-
'चातुर्वैद्यं विकल्पी च अङ्गविद्धर्मपालक: ।
आश्रमस्थास्त्रयो विप्रा पर्षदेषा दशवरा: '॥
गौतमेन सूत्रान्तरै: क्रमेणान्वेषामपि परिषत्वं सम्भवति इति प्रतिपादितम् ।
[२०] 'असम्भवे त्वेतेषां श्रोत्रियो वेदविच्छिष्टो विप्रतिपत्तौ यदाह'।
अत्र एतेषां व्यस्तानां समस्तानां च बहूनामसम्भवे श्रोत्रियो वेदस्याध्येता स्वधर्मनिरत इति एवम्भूतस्य जनस्य वचनं पालनीयमिति । विषयेऽस्मिन् मनुनोक्तम्[२१]-
'एकोऽपि वेदविद्धर्म यं व्यवस्येत् समाहित: ।

International Journal of Engineering, Management and Humanities (IJEMH)
Volume 4, Issue 1, pp: 85-88 www.ijemh.com

स धर्मः परमो ज्ञेयो नाज्ञनामुदितो युतै'रिति ।
अस्य श्लोकस्य व्याख्या टीकारेण कुल्लुकभट्टेन एवं कृता-एकोऽपि वेदार्थधर्मज्ञो सं धर्मं निश्चिनुयात् ,प्रकृष्टो धर्मः स
बोद्धव्यो न वेदानभिज्ञानां दशभिः सहस्रभिरप्युक्तः । स्मृतिपुराणमीमांसान्यायशास्त्रज्ञोऽपि गुरुपरम्परोपदेशविच्च ज्ञेयः ।
तत्र कारणरूपेण सूत्रान्तरं विरचितं गौतमेन[२२] –

'यतोऽयमप्रभवो भूतानां हिंसानुग्रहयोगेषु ' ।

वक्तव्यमिदं गौतमस्य यद् व्याख्यातं हरदत्तकृतमिताक्षराटीकायां तस्य प्रतिपाद्यमिदं यत् के नाम शिष्टाः, येषां निर्देशा-
दयो धर्मप्रमाणत्वेन परिग्राह्या। ते क्वचिदपि प्राणिनामनुग्रहप्रदर्शने तथा हिंसानिग्रहादिषु कर्मसु कदापि न तत्परा भवन्ति।
पुनरपि गौतमधर्मसूत्रे बहवो युगान्तकारिसिद्धान्ताः प्रतिपादिताः । यथा-संस्कारस्य संख्या विषये तेन प्रोक्तम्-चत्वारिंश-
त्संस्कारा अष्टौ आत्मगुणाश्च इत्येवं प्रकारेण अष्टचत्वारिंशत्संकाराः । वेदाविरुद्धा देश-जाति-कुल-वर्णधर्मा विद्यन्ते ।
रजोदर्शनात्प्रागेव पिता कन्यां विवाहयेत् । स्त्रियो धर्मकार्ये न स्वतन्त्रा भवन्ति । ब्राह्मणोऽपराधं कृत्वा शरीरं दण्डं न
प्राप्नुयात् । अपुत्रिकस्य मरणात्परं विधवाया नियोगं स्वीकरोतीत्यादीनि भवन्ति ।
महर्षिगौतमस्य निवासस्थानविषये मतद्वयं विद्यते-केनाप्युक्तुम्-अस्य महाभागस्य जन्म गोदावरीतीरे वभूव । तेनासौ
महाभागो दक्षिणभारतीय आसीत् । पुनः केनापि प्रोक्तम्-मिथिलानिवासी गौतम इति । तत्र बौधायनस्य मतमतीव गुरु-
त्वपूर्णमस्ति यत्-गौतमधर्मसूत्रं सम्पूर्णभारतीयानां कृते विशेषतो दक्षिणोत्तरभारतीयानां कृते मान्यता दरीदृष्टा ।कुमारिल-
भट्टमतानुसारं गौतमधर्मसूत्रं सामवेदेन सम्बद्धम् । सामवेदीयराणायनीयशाखाया नवोपविभागेषु मध्ये एकोपविभागीय-
शाखाकार आचार्यगौतम आसीत् । तद्विरचिते धर्मसूत्रेऽस्मिन् अष्टाविंशतिरध्यायाश्चतस्रः टीकाः सन्ति ।यथा-असहायेन
असहायटीका,मस्कराचार्येण मस्करी टीका , हरदत्तेन मिताक्षरा टीका,पण्डितकुलमणिमिश्रेण सूक्ष्मा टीका चेति । तासु
टीकासु हरदत्तेन मिताक्षरा टीका अतीव पाण्डित्यपूर्णा गुणिजनसमादरणीया विद्वद्गोष्ठिषु प्रशंसिता विद्यते ।अस्य महा-
भागस्याविर्भावकालविषये ड .पि. भि. काणेमहाभानां मतानुसारं ख्रीष्टात् पूर्वं षष्ठशतकादारभ्य ख्रीष्टात् पूर्वं चतुर्थशतका-
भ्यन्तरे एव भवेत् । अतो भारतवर्षेऽस्मिन् गौतमधर्मसूत्रस्य प्राथम्यं प्राधान्यं च वर्त्तते इत्यत्र नास्ति सन्देहावकाशः ।

पादटीका-

| | | | |
|---|---|---|---|
| १. ध. सा. इ-पृ- १२ | ७-गौ. ध. सू. -१/१/२ | १३. बौ. ध. सू-१/१/४ | १९. गौ. ध. सू-१/१/७ |
| २. पा. महा. भा-चृ-५४ | ८-मी. द. -१/३/२ | १४. बौ. ध. सू-१/१/१७ | २०.गौ. ध. सू-३/१०/४८ |
| ३. गौ. ध. सू-१/१/१ | ९. म. स्मृ -२/६ | १५. बौ. ध. सू-१/१/२२ | २१. म. स्मृ-१२/११३ |
| ४. वै. वा. इ-पृ-४ | १०. म. स्मृ-२/१२ | १६. बौ. ध. सू-१/१/२३ | २२. गौ. ध. सू- ३/१०/४९ |
| ५. बौ. धा. सू-१/१/१ | ११. गौ. ध. सू-१/१/३ | १७. गौ. ध. सू-३/१०/४६ | |
| ६-म. स्मृ- २/१३ | १२. गौ. ध. स२- पृ-२ | १८. गौ. ध. सू- ३/१०/४७ | |

ग्रन्थपञ्जी-

१. धर्मशास्त्रेतिहासः - लेखकः-प्रो. जयकृष्णमिश्र, चौखम्बा संस्कृतसीरीज आफिस,वाराणसी -२२१००१
२. पातञ्जलिमहाभाष्यम्- प्रकाशकः-दण्डीस्वामी दामोदर आश्रम, दक्षिणेश्वर, आद्यापीठ,कोलकाता-७०००७६
३. गौतमधर्मसूत्रम्- चौखम्बासंस्कृतसंस्थानम् ,वाराणसी-२२१००१
४. बौधायनधर्मसूत्रम् – चौखम्बासंस्कृतसिरीज् अफिस् , वाराणसी-१९३९
५. मनुसंहिता- चौखम्बासंस्कृतसिरीज् अफिस् , वाराणसी-१९३९
६. मीमांसादर्शनम्- ताराबुक एजेन्सी, वाराणसी-२२१०१०